श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४१

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४१

*पूतनाशरीरदाहवर्णनम्,*
*गोपीनां बालाललनकौतुकवर्णनम् च*

व्रजेश्वरः शौरिवचो निशम्य समाव्रजन्नध्वनि भीतचेताः।
निष्पिष्टनिश्शेषतरुं निरीक्ष्य कञ्चित्पदार्थं शरणं गतस्त्वाम्॥ १ ॥

निशम्य गोपीवचनादुदन्तं सर्वेऽपि गोपा भयविस्मयान्धाः।
त्वत्पातितं घोरपिशाचदेहं देहुर्विदूरेऽथ कुठारकृत्तम्॥ २ ॥

त्वत्पीतपूतस्तनतच्छरीरात् समुच्चलन्नुच्चतरो हि धूमः।
शङ्कामधादागरवः किमेष किं चान्दनो गौल्गुलवोऽथवेति॥ ३ ॥

मदङ्गसङ्गस्य फलं न दूरे क्षणेन तावत् भवतामपि स्यात्।
इत्युल्लपन् वल्लवतल्लजेभ्यः त्वं पूतनामातनुथाः सुगन्धिम्॥ ४ ॥

चित्रं पिशाच्या न हतः कुमारश्चित्रं पुरैवाकथि शौरिणेदम्।
इति प्रशंसन् किल गोपलोको भवन्मुखालोकरसे न्यमाङ्क्षीत्॥ ५ ॥

दिनेदिनेऽथ प्रतिवृद्धलक्ष्मीरक्षीणमाङ्गल्यशतो व्रजोऽयम्।
भवन्निवासादयि वासुदेव प्रमोदसान्द्रः परितो विरेजे॥ ६ ॥

गृहेषु ते कोमळरूपहासमिथः कथासङ्कुलिताः कमन्यः।
वृत्तेषु कृत्येषु भवन्निरीक्षासमागताः प्रत्यहमत्यनन्दन्॥ ७ ॥

अहो कुमारो मयि दत्तदृष्टिः स्मितं कृतं मां प्रति वत्सकेन।
एह्येहि मामित्युपसार्य पाणी त्वयीश किं किं न कृतं वधूभिः॥ ८ ॥

भवद्वपुः स्पर्शनकौतुकेन करात्करं गोपवधूजनेन
नीतस्त्वमाताम्रसरोजमालाव्यालम्बिलोलम्बतुलामलासीः॥ ९ ॥

निपाययन्ती स्तनमङ्कगं त्वां विलोकयन्ती वदनं हसन्ती।
दशां यशोदा कतमान्न भेजे स तादृशः पाहि हरे गदान्माम्॥ १० ॥

**********